M-2976

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विक्रम सवंत)	Additional Particulars / Remark
शांती मयूख	-	वेदांग	अपूर्ण	-	3/6	124	संस्कृत	कागद	10	31		

अस्यादृष्टपापविनाशनिदानकेतिकमात्रानिष्टनिवर्त्तकंपापाप्रयोजन
कंवैघ्नंभकर्मशांतिकं॥३॥

श्रीगणेशायनमः॥श्रीसरस्वत्यैनमः॥श्रीगुरुभ्योनमः॥श्रीभै
रवसारपां॥श्रीमहःसेमहःसमाराध्यसमाकर्ण्यगुरोर्गिरः॥समुद्ध
तोनिलकंठेवकुशांतिकपौष्टिकौ॥क्षयादिहरदानोद्दावतिप्रसं
गवारयितुंनिदानकांतं॥आमुष्मिकानिष्ट निवर्तकेतंवारयि
तुमैहकेति॥प्रायश्चित्तेवारयितुंमात्रपदं॥प्रायश्चित्तंत्वामुष्मि
कानिष्टनिवर्तकमपि॥अभिचारप्रत्यभिचारस्वारयितुंपापा
प्रयोजकमिति॥तयोःफलतोहिंसात्वेनतदनुष्ठानेप्रायश्चित्तोक्ते
नि श्चपापप्रयोजकत्वात्॥अनिष्टवर्तकत्वंचशांतिकस्यतन्निदान
पापरूपसामग्रीविघटकत्वेनपुष्टिफलकवैघ्नंकर्मपौष्टिकं॥

अस्यदृष्टपापविशेषनिदानकेतिकमात्रानिष्टनिवर्त्तकंपापप्रयोजन
कंवैद्यंभकर्मशांतिकं ॥३॥
श्रीगणेशायनमः ॥ श्रीसरस्वत्यैनमः ॥ श्रीगुरुभ्योनमः ॥ श्रीभै
रवसारपां ॥ श्रीमहसेमहसमाराध्यसमाकर्ण्यगुरोर्गिरः ॥ समुप
तोनिलकंठेवकुंशांतिकपोष्टिकं ॥ क्षयादिहरदानादावतिप्रसं
गवारयितुंनिदानकांतं ॥ आमुष्मिकानिष्ट निवर्तकेतं वारयि
तुमैहकेति ॥ प्रायश्चित्तेवारयितुंमात्रपदं ॥ प्रायश्चित्तं चामुष्मि
कानिष्टनिवर्तकमपि ॥ अभिचारप्रयोगाभिचारवारयितुंपापा
प्रयोजकमिति ॥ तयोः फलतोहिंसात्वेनतदनुष्ठानेप्रायश्चित्तोत्ते
श्चपापप्रयोजकत्वात् ॥ अनिष्टनिवर्तकत्वंचशांतिकत्वंतन्निदान
पापरूपसामग्रीविघटकत्वेनपुष्टिफलकत्वंचंकमपिपौष्टिकं ॥

नि

नि २

तत्रपरिभाषामार्कंडेयपुराणे॥शिरस्नातस्यकुर्वीतदैवंपित्र्यमथापि
वा॥प्राङ्मुखोदङ्मुखोपापिरमश्रुःकर्मचकारयेत्॥तत्रैवदेवार्च्चना
द्वि ४ दिकर्माणितथागुर्वभिवादनं॥कुर्वीतसमगाचम्यप्रयतोपिस
दाँजः॥बृहन्मनुः॥प्राणायाम्यकुर्वीतसर्वकर्माणिसंयतः॥मार्कंडेयः॥ डे ४
॥२१॥ संकल्प्यविधिवत्कुर्यात्स्नानदान[illegible]दि॥देवलः॥मासपक्ष
तिथीनांचनिमित्तानांचसर्वशः॥उल्लेखनमकुर्वाणोनतस्यफ म
भाक्भवेत्॥इतिमासपक्षतिथयः॥प्रयोगाधिकारपिमृतः॥ ॥२१॥
सर्वेपि॥यत्तुअनेकदिनसाध्यकर्मण्याद्यदिनेसंकल्पकालीनं
तिथिमधिकृत्यसेनोक्तिस्यज्योतिष्टोमेनाहंयक्ष्येइत्यादिसंक

वाक्यंप्रयुंजतेयात्रइत्युक्तः॥तत्रतुपदानामन्वयायोगादानर्थक्यं॥
ग२ यद्यपिकेचित्तेनतेनरूपेणाप्रयोगात्तेषांविहितानामेवमासादिमु
ख्येखइतितदपितामानोभावात्॥अविहितमासादिकंआप्या
नाद्रोमासपक्षतिथिनांज्योतिष्टोमणकृदर्शनतादौचमासप
क्षयोरुल्लेखाभावावप्रसंगाच्च॥अतोज्योतिष्टोमादावेकादशमा
दिपदर्पिमांतानामुल्लेखः॥एवमन्यत्रापिद्रष्टव्यं॥अत्रचस्त्रीशूद्राणा
मप्यधिकारः॥श्रावयेच्चतुरोवर्णान्कृत्वाब्राह्मणमग्रतइत्या त३
दिवाक्येषुश्रावणस्यच्छत्सार्थतयारागप्राप्तत्वेनतद्विधौवाक्य
वैयर्थ्यापत्तेर्णिज्यविवक्षयाश्रवणविध्यानात्तेषांपुराणश्रव

णोधिकारेण तान सम्भवात्॥ वैदिकेमंत्राभावे कथं तदस्य कर्म्म
स्वधिकार इति चेत्॥ शृणु धर्म्मेप्सवस्तु धर्म्मज्ञाः॥ सतां धर्म्ममनु
ष्ठिताः मंत्रवर्ज्जं न दुष्यंति प्रशंसां प्राप्नुवंतीति चेति मनुना मंत्रवर्ज
नात्॥ यत्तु मेधातिथिः मंत्रवर्ज्जं तेषु [illegible] उपवासादि
॥२॥ ष्वधिकारार्थमिदं न तु स मंत्रकेषु मंत्रपर्युदासेनाधिकारार्थ
मिति तत्तु अमंत्रकोपवासादिषु श्रवणविधिनैवाधिकारसि
द्धावेतद्वाक्यानर्थक्यापत्तेः॥ अतएव मोक्षधर्म्मेष्वपि मंत्रव ॥२८॥
र्ज्जं न दुष्यति कुर्वाणाः पौष्टिकीं क्रियामिति॥ अत्रैतद्वाक्यस्य
पौराणत्वे न तस्मामान्योपस्थितपौराणक्रियोद्देशेन मंत्रव

र्थे न विघ्नोपोषिकौ मिस्रदेवस्य विंषणत्वेवाविवक्षितत्वात्॥
एवं च मनुवाक्यं स्येतस्य चैवैवक्रतिर्मन्त्रत्वेन कल्प्यते॥ गण स्व
परिसिद्धे॥ आदौ विनायकः॥ पूज्यं अंते तु कुलदेवताः॥ शौनकः॥
पुण्याह वाचनविधिं वक्ष्यामो यथाविधि॥ प्रयोक्तुः कर्मणामा
दावंते चोदये सिद्धये॥ कर्मप्रदीपे कर्मादिषु तु सर्वेषु मातरः
सगणादिपः॥ पूजने यांप्रयत्नेन पूजिता पूजयंति ताः॥ प्रतिमा
रिवा२ सुचतुर्थ्यां सुलिखिता वापटादिषु॥ अपि वाक्षतपुंजेषु नैवेद्यैश्च पृ तर
थिग्विधैः॥ कुड्यलग्ना वसोर्धाराः सप्तवारं घृतेन तु॥ कारयेत्पंचधा
रां वा नातिनिचां न चोच्छ्रिताः॥ आयुष्याणि च शांत्यर्थं जप्त्वात

त्र समाहितः॥ षष्ठ्यः पितृभ्यस्तदनु श्राद्धदानमुपक्रमेदिति॥ प
ष्ठ्य इति कात्यायनं दोषपरं॥ अन्येषां तु नवदेवास्यां अन्वष्टका
स्तु वृद्धौ च गयायां च क्षये हनि॥ अत्र मातुः॥ पृथक् श्राद्धम
न्यत्र पतिना सहेति ना सहेति वचनात्॥ सर्वत्राचार्यो यजमान
॥३॥ समशाखां एव॥ अन्यथाचार्यस्य यजमानशाखाध्ययनाभावेन
छोरविपपदार्थानां निर्वाणावनस्यात्॥ स्वशाखायेवानुष्ठानक
त्तुवैगुण्यं॥ तथा च पराशरः॥ यः स्वशाखां परित्यज्य परशाखां समा ॥३॥
श्रयेत्॥ अप्रमाण्यमृषिं कृत्वा सोंधतमसि मज्जतीति॥ ऋत्विज
स्तु भिन्नशाखा अपि सर्वे यथाचार्यब्रह्मर्त्विजो मधुपर्केण प

स्याः॥ ऋत्विजो वृत्वा मधुपर्कमाहरेदित्याश्वलायनोक्तेः॥ संवरणे
मधुपर्केण ऋत्विजः कर्म कारयेदिति विश्वामित्रोक्तेश्च यो ऋत्विग्य
च्छाखीयं कर्म करोति तच्छाखोक्तेन प्रकारेण कांडानुसमयेन म
धुपर्कं कुर्वंति याज्ञिकाः केचित्तु परे यजमानशाखोक्त्या य
जमाने स्वशाखीया ऋत्विग्भिश्च स्वशाखीयाः पदार्थाः अनेके ऋ
त्विक्षु पदार्थानुसमयेनानुष्ठेया इति तु युक्तं तच्छाखाप्यमनजे
न्यसानस्यांगत्वादेव प्रयोगविधिपरिग्रहाच्च ऋत्विग्भ्यो देयमुक्तं
लिंगपुराणे॥ वस्त्रयुग्मं तथा पुरं केयूरं कर्णभूषणं॥ अंगुलि
भूषणं चैव मणिबंधस्य भूषणं॥ कंठाभरणयुक्तानि प्रारंभेप्व

कर्मे
मेषाः॥ पुरोहिताय दत्वाथ कैश्चिग्ध्यो श्वापि द्रापयेत्॥ प्र आपः प्र
वर्तेस्मिन्निस्यपदरं जल्पात्रं॥ मत्स्यपुराणे॥ यजमानः सपत्नि
कः पुत्रयुतः समन्विताः॥ पश्चिमद्वारमाश्रित्य प्रविशेद्यागमं
डपं॥ संग्रहे॥ समंततश्च सिद्धार्थान्विकिरे द्राक्षोघ्न मंत्रतः प्र
तिष्ठासारे॥ सर्वतः पञ्चगव्येन प्रोक्षयेद्यागमंडपं॥ आपो हि
॥४॥ ष्ठात्र्यचेनैव ततः स्वस्त्ययनं जपेत्॥ अत्र हेमाद्रौ वास्तुप्रजा पु ॥४॥
त्रास मंडपं प्रविश्याथ तोरणादि प्रपूज्य च॥ वास्तुयागं ततः कु
र्यात्प्रासादे मंडपे शिवा॥ वास्तुमंडलकेचैव नैऋत्यां नैऋत्यादि
शि वास्तोष्पतिं ब्रह्माद्यांश्च समर्चयेद्विशारदोत्तरैः॥ वास्तुहि

मस्यभिन्नस्थंडिले कार्यः॥ मुख्यायतने वा॥ तत्रोत्पादोपकु
प्रयोगतया॥ प्रधानसमानतंत्रतया वा॥ शारदातिलके तु होमप
र्वनोक्तः॥ सर्वं च शांतिकपौष्टिकमहादानादि लौकिकाग्नौ का
र्यं॥ श्रौतस्मार्ताग्निप्राप्तौ मानाभावात्॥ यत्तु मनुः॥ वैवाहिके
ग्नौ कुर्वीत गार्ह्यं कर्म यथाविधि॥ पंचयज्ञविधानं च पंक्ति
चान्वाहिकीं गृहीति तत्स्यैवं गृह्योक्तपरं वैवाहिक इति व
दारदं यावद्गृहपातमरणकालीन्यनामप्युपलक्षकं तत्स
जातियसंस्कारस्यैव सादनसावच्छेदकत्वात् यदपि याज्ञ
वल्क्यः॥ स्मार्तकर्म विवाहाग्नौ कुर्वीत प्रत्यहं गृही॥ दा

यत्कालादृते वापि श्रौतं वैतानिकाग्निष्विति तत्रापि सामान्यं स्मा
र्त्तपदं गार्ह्यं तदुपसंक्रियते। एतेनाहवनीयादयो निरस्ताः यदा
हवनिये जुहोति स्यादावग्रेयं प्रतिग्रहे वैदिकत्वसाम्येन वैदि
कस्य दानप्रतिग्रहोपस्थितिवत्तु वैदिकहोमोपस्थितेश्चा
११५॥ यदप्यत्र गार्ह्यं स्मार्त्तमेव श्रौतं च वैतानिकमेवेति नियमे ११५॥
न स्मरसूत्रेपि कर्म्मणि श्रौतस्मार्त्तयोः प्राप्तिसंभाव्यते॥
तथापि न साहवनियावसथ्यत्वादिरूपेण किंतु लौकिक
साधारणसंलग्नत्वेनैव। अवैधाहुते प्रक्षेपे आहवनीय
त्वादिविघातापत्तेश्च अतएव सर्वाधानिन औपासन

भावाद्धोतिलानिकाप्रासेऽप्यतेनगार्हस्थ्यंलौकिकंएवकार्यं
अमुमेवसर्वमर्थंस्मृत्यर्थसारदरदपिसंजग्राह॥गार्हस्थ्यमौ
पासनेकुर्यात्सर्वाध्यानीतुलौकीके॥स्मार्तेचलौकिकेकु
र्याद्धोतंवैतनिकाग्निषुइति॥यत्तुनारायणवृत्तौ॥सर्वाध्यानि
नामीमंत्रोक्तयनादिगार्ह्यंकर्मार्थंस्मार्ताग्निलस्पादनियइ
तिलत्रमस्तलमन्वेष्यं॥यदपिविसानेश्वरोगृहयसेऔपास
नरस्कृच्यते॥तत्रापिमस्तलमन्वेष्यंकातीयरंवातत्॥तस्त
त्रेतथाम्नानात्॥अतरववसविनायकशांतौलौकिकाग्नो

मेवावोचत्॥ अतस्सूत्रस्य तत्त्वं लौकिके एवेति दिक्दर्सरणा
करे॥ शुभपात्रं तु कांस्यं स्यात्तेनाग्निं प्रणयेद्बुधः॥ तस्याभा
वे शरावे पानवेनाभिमुखं वतं॥ गोभिलीये॥ आहुत्यैव हो
तव्यो यो यत्र विहितो नलः॥ तथा लक्षहोमे च वह्निः स्यात्को
॥५॥ टिहोमे तु हुताशनः॥ पूर्णाहुत्यां मृडो नाम शांतिके वरदः सदा॥ ॥५॥
अन्येषु संस्कारादि कर्मसु योगेनामविशेषः प्रयोगरत्ने शेषः॥
होमेषु विशेषो गोभिलीये न मुत्केशो हुंज्जुयान्नातिपा
तितजानुकः॥ उत्तानेनैव हस्तेन अंगुष्ठाग्रेण पीडितं॥

संहतांगुलिपाणिस्तु वाग्यतो जुहुयाज्जुविरिति॥ बहुकर्तृ
के होमे प्रत्याहुति त्यागासत्तेः होमारंभे एव सर्वा देवता
श्चतुर्थ्यंतेनोद्दिश्य सर्वाणि द्रव्याणि त्यजेति होमाद्यादय
इति परिभाषा॥ अथ विनायकस्नापनं॥ याज्ञवल्क्यः वि
नायकः कर्मविघ्नासिध्यर्थं विनियोजितः गणानामधिप
त्ये च रुद्रेण ब्रह्मणा तथा तेनोपसृष्टो यस्तस्य लक्षणानि
निबोधत॥ स्वप्ने च गाहते त्यर्थं जलं मुंडांश्च पश्यति॥ का
षायवाससश्चैव क्रव्यादांश्चाधिरोहति॥ अंत्यजैर्गर्दभैरुष्ट्रैः॥

सोहं कृत्वावतिष्ठति। व्रजन्नपि तथात्मानं मन्यतेनुगतं परैः॥ उप
स्पृष्ट उपहतः॥ स्वप्ने स्रोतसाऽप्यक्रियते तत्र मज्जति वा न स्व
वगाहनमात्रं विवक्षितं तस्य शुभे स्वच्छे स्रोतरात्रं स्यजेश्च
[struck out] तेडालैः॥ प्रसक्षल्ले क्षणान्याह॥ विमनो विफलारंभः
॥८॥ संसीदत्यनिमित्तकः॥ तेनोपसृष्टो न लभते न राज्यं राजनं
दनः॥ कुमारी नैव भर्तारमपत्यं गर्भमंगना॥ आचार्यत्वं श्रो ॥८॥
त्रियश्च न शिष्योऽध्ययनं तथा॥ वणिक् लाभं च नाप्नोति कृ
षिं चापि कृषीवलैः॥ संसीदति कारणं विनादीनमस्कोऽथ
ति॥ एवदुपलक्षणं यस्यादिवं स्वच्छेदृष्टसामग्री स्वच्छेन

तत्प्राप्नोतितस्मात्तदुपक्रांतोवोव्याप्तत्तदुपद्रवपरिहारार्थं च कर्म्मी
हं॥ स्नपनं तस्य कर्त्तव्यं पुण्यवन्हि विधिपूर्वकं॥ अत्र पुर्वेण्ये
न्हीयविशेषेपि विशेषाहे माङ्गोऽस्य विष्णु॥ शुक्लपक्षे चतुर्थ्यां च
वारेपोधिषणस्य चातिक्ष्णे च वीरनक्षत्रे तस्यैव पुरतोन्यपे
ति। अत्रादौ देवतापूज्योत्तात्रैव। व्योमकेशं तु संपूज्य पार्वतीं
भीमजं तथा। ध्रवक्षस्य पितरं तात अर्कमौरं स्मिरं तथा॥ धिष
णं केदपुत्रं च कौणं लक्ष्म च भारत। विपलं बाहुल्ले यं नंदकस्य
च धारिणामिति व्योमकेशः शिवः। भीमजो गणेशः। आदौ भौ
मः। सितशुक्रः। धिषणो गुरुः। क्ष्मेदपुत्रो बुधः। कौणशनैश्चरः॥

लक्ष्मत वाश्चंद्रः। बाहुल्लेपः स्कंदः नंदकूदकूष्मारीररक्षः। द्विं चगौ
रसर्षपकल्केन साज्येनोत्सादितस्य च सर्वौषध्यैः सर्वगंधैर्वि
लिप्तशिरस्तथा। भद्रासेनोपविष्टस्य स्वस्तिवाच्यादिजाः।
शुभाः गौरसर्षपपिष्टेन कल्केन गोघृतयुक्तेनोत्सादितस्योद्वा
॥८॥ र्तितस्य। सर्वौषध्यानिष्कंदेगपरिसिक्तो कुंकुं मांसाहद्रेदमु
राशैलेयचंदनं। वचाकुष्टं रपुस्ताव सर्वौध्यः प्रकीर्तितः इ ॥८॥
ति सगंधैश्चंदनकुंकुमागरुकस्तूरिकाजातीफलादिभिः।
त वेष्टयांसि वस्त्रप्रपच्छादितश्रीयणीपीठभद्रासनं स्वस्तिवाच्याः
स्वस्तिवाचनीयाः। ब्राह्मणद्वारा स्वस्तिवाचनं कारयेदि

सर्वौषधीः ॥ अश्वस्थानाद्गजस्थानाद्वल्मिकात्संगमाद्ध्रदात्मृत्तिरोचनां ॥
गंधगुग्गुलं चाप्सु निक्षिपेत् ॥ या आहृता एकवर्णैश्चतुर्भिः क
लशैर्ह्रदात् ॥ चर्मण्यानडुहे रक्ते स्थाप्य भद्रासनं ततः आनडु
हं चर्म चर्वेद्यां प्राग्ग्रीवमूर्ध्वलोमं च स्थाप्यमिति विसानेश्वरः ॥
या अपः ते चत्वारो पि कलशा भद्रासनात्पूर्वादि चतुर्दिक्षु स्था
प्याः इति सांप्रदायिकाः ॥ पूर्वादिकूर्च्यपावस्थितं कलशोदकेनाभि
षेकः क्रमेण मंत्रानाह ॥ सहस्राक्षं शतधारं ऋषिभिः पावनं कृतं
तेन त्वामभिषिंचामि पावनीः पुनंतु ते । भगं ते वरुणो राजा भ
गं ते सूर्यो बृहस्पतिः । भगमिंद्रश्च वायुश्च भगं सप्तर्षयो ददुः ॥

यत्तोके शेषु दौर्भाग्यं सीमंते चमस्तूनि॥ ललाटे केशपोरक्षणा रा
प स्वं [illegible] तुले स हा॥ सह स्तो स्वं बहु शान्ति कं पावनी यीस्य नं तर
पाप इति शेषः॥ भगं कल्याणां दौर्भाग्येम कल्याणी॥ उद् ग्दि वस्थि
नी त्रिषेके पूर्वां त्रीय एव मंत्रः॥ सर्वैश्वर्यतु र्थमिति विसोनेश्व
२२।८ रो त्सलिंगात्॥ क्रिंचा स्नातस्य सार्ष यंते लं स्तुवे चौदुंबरेणा तु॥ २२।८
जुहु यात्मस्तूनि कुशान्सव्येन परिगृह्य च॥ सव्य पाणीगृहीत
कुशांत हिते सार्षपते लमदुं बरनिर्मितेन स्तुवेण यजमानम
स्तूनि जुहुया द्वा चार्यः॥ मिति श्व सं मितश्चे वतथा रा ले ब्रह्मै
दौ॥ कूष्मांडो राजपुत्रा श्चे यंते स्वाहा समन्वितेः॥ नाम भि

बलिमंत्रैश्चनमस्कारसमन्वितैः॥नमस्तुस्तिस्वाहेति चतुर्थ्यैए
तानिषट्विनायकनामानिइति विसानेश्वरः॥अपरार्कस्तु
स्मालकटंकटइत्येकवचनानंतंपपाठ॥तेननतेनमतेपंचैवाहुत
योभवंति॥अत्रलौकिकाग्नौस्थालीपाकविधिनाचरुंसृत्वातेन
एवाहुतिषट्कंहुत्वेंद्रादिदशलोकपालेभ्यः स्वस्वनाम्नाबलिं
दद्यात्॥इतिमिताक्षरायां तत्रचरुहोमेइंद्रादिभ्योबलिदानेच
मूलंचिं[illegible] अंते स्वाहासमन्वितैर्नामभिर्जुहुयात्॥नम
स्कारसमन्वितैश्चमित्यादिभ्यो बलिंदद्यात्॥इति वक्ष्यमा
णेनसंबोध्यतइतितुयुक्तं चदद्याचतुष्पथेश्चकुशानास्ति

यैः सर्वशः प्रतिप्रतास्तुल्लानांश्च पल्लौदनमेव च ॥ मत्स्यान्य
क्वांस्तथैवामान्मांससमेतान्दैवेवतापुष्पं चित्रं सुगंधीच सुरांच
विविधामपि ॥ मल्लकं परिकापूपास्तथैवोंडकस्रजः ॥ दध्योना
पायसंचैवगुडपिष्टतु समोदकं ॥ तान्सर्वान्समाहृत्य भूमौ प्र
त्वा ततः शिरः ॥ प्रतीष्टतान्सप्रदद्यहतान्पल्लपाल्लौदनः ॥ ॥१०॥
तिल्लपिष्टमिष्टओदन इति मिताक्षरो यां अपक्वमासमिश्र
ओदन इति तु युक्तं ॥ पल्ल्लं कव्यमामिषपतिकोशात् ॥ आमान्न
क्वान्नमांससमेतावदेवतु ॥ पक्वमपक्वंचामांसमन्यद्विस्यर्थः ॥
त्रिविधासुरागौडीपैष्टीमाध्वीच मल्लकं कंदाकारोभक्ष्य

विशेष इति मिताक्षरायां स्वरूपत एव ग्राह्यमितु युक्तं ॥ उ
भयं मपि ग्राह्यमिति मेरुपर्वे ॥ अपूपा अभ्यस्ते हम कागो
धूम विकारा इति विज्ञानेश्वरः ॥ उंडेरे कोः पिष्ट विकारा न
वि बास्ते प्रोक्ताः स्वजइ स्फुच्यंते ॥ गुडपिष्टं गुडमिश्रं शा
ल्यादि पिष्टं ॥ अत्र सुरामांसं चा ब्राह्मणा विषयं ब्राह्मणोस्तु
मांस सुरास्थाने सलवणपायसं दुग्धं च ग्राह्यं ॥ पासं लव
णोपेतं मांसस्थाने प्रकल्पयेत ॥ दुग्धं लवणसामिश्रं सुरा
स्थाने प्रकल्पयेदिति महार्णवादिषु विनायकाबिकागायत्री
भ्यां विनायकमंबिकां चेनमस्कृत्य पूलद्रव्यजातं तयोरग्र

तउप स्कृत्यतत्सर्वं कृत्वा शूर्पे निधायचतुष्पथे शूर्पे संस्थाप्य बलिं
दद्यादेतैर्मंत्रैः बलिंग्र ॐ इमं देवा आदित्या वसवस्तथा॥म
रुतोथाश्विनौ रुद्राः सुपर्णाः पन्नगाग्रहाः असुरा यातुधा
नाश्च पिशाचा मातरोरगाः॥ शाकिन्यो यक्षवेताला योगिन्यः
॥११॥ पूतनाशिवाः॥ जृंभकाः सिद्धगंधर्वा नागा विद्याधरा नगाः॥
दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः॥ जगतां शांति ॥११॥
कर्तारो ब्रह्माद्याश्च महर्षयः। मा विघ्नं मा च मे पापं मा संतु प
रिपंथिनः॥ सौम्या भवंतु तृप्ताश्च भूताः सुरवावहाः॥ दद्या
दित्यत्रापि देहलीं हृदि पवदन्वेति॥ विनायकस्य जननि मुप

तिष्ठ तलोंबिका॥ दूर्वासर्षपपुष्पाणां दत्वार्घपूर्णमंजलिं॥ अ
नंतरं विनायकमंबिकां च दूर्वाधंजलिं महर्षे चद्योपतिष्ठते
तउपस्थानं मंत्रं माहा। मां रूपं देहि यशो देहि भगं भगवति देहि
मे। पुत्रां देहि धनं देहि सर्वान्कामांश्च देहि मे॥ देहि मे भगव
न् भगमिस्य विनायकमुपतिष्ठते॥ इति विसोनेश्वरः॥ अ
मत्रौ विनायकोपस्थानं परत्वां विनायकोपस्थानं कार्यमित्याह॥ किं
चा ततः शुक्लांबरधरः शुक्लमाल्यानुलेपनेः॥ ब्राह्मणान्भोज
यद्द्याद्वस्त्रयुग्मं गुरोरपि गुरोराचार्यो। आशिशवादक्षिणामपि
एवं विधं कर्म कुर्वतः फलमुक्तं॥ एवं विनायकं दत्वा ग्रहांश्चैव वि

ध्यानतः॥ कर्म्मणांफलमाप्नोतीश्रीच माप्नोत्यनुत्तमं॥ स्याः क
र्म्मांगत्वेनपोषितं॥ येनचवर्णचतुष्टयस्याप्यत्राधिकारः॥ शू
॥१२॥ द्रस्यतु मंत्रवर्ज्जैतान्॥ प्रकुर्य्यान्मंत्रवर्ज्जेन॥ दुष्यंति कुर्वाणाःपो
षिकींक्रियामिति मोक्षधर्मेश्चवणान महार्णवे पिप्पलमा
दि नस्तु शूद्रश्चैतिवदन्॥ तस्याधिकारमाह प्रेति॥ इतिविनायक
शांतिः॥ अथप्रयोगः॥ कर्त्ता देशकालौ संकीर्त्य मुकककर्म्मणो ॥१२॥
निर्विघ्नतासिध्यर्थं मुख्यसर्गनिवृत्यर्थं वा विनायकस्नपनं
करिष्येइति संकल्पयेत्॥ ततः पुण्याहवाचनादिचनांदिश्रा
द्धांतंच योत्तु कुर्यात्॥ अपरे पुण्याहवाचनंनेछंति॥ अग्ने

तस्यकर्त्तव्ययात्र॥ अथाचार्य ऋत्विक्। चतुष्टयं च वृणुयात्। ऋ
त्विजो नसं। तांतिके चित्। तदाचार्य एव। वक्ष्यमाणमभिषेकं कुर्यात्॥
ॐ ये मा नः प्रतिमास्य क्षतं पुजेषु वा ति। त्रावं पार्वतीं गणेशं वसुदे
वं केतुं अर्कं भौमं। शुक्रं। गुरुं। बुधं शनिं चंद्रं। राहु स्कंदं दक्षं चावा
स्य पूजयेत्॥ तथाचार्यः पंचवर्णैः रजैः पूर्वादि चतुर्दिक्षु चत्वा
रि मध्यस्थं वे यांचैकमिति स्वस्तिकं पंचमालिख्य मध्यस्थस्व
स्तिकोपरि यान्तु उहंर तं चर्मं प्राचीनग्रिवम् ऊर्ध्व लोम संस्थाप्य त
स्योपरि श्रीपिठं संस्थाप्य सितेन वाससाच्छादयेत्। एत ऋग्र
सनो मिति। अथ चर्षस्वस्तिके चर्षके पूर्वादि दिक्षु चयारोपि।

ऋत्विजः कलशान् संस्थापयेयुः। आचार्यो वा तत्रायं प्रकारः।
॥१३॥ महीद्यौः पृथिवी चनेति भूमिं स्पृशन् संप्रार्थ्य। ओं षधयः सं
मितियवान् क्षिप्त्वा। आकलशेषु धावतीति तेषु कलशं संस्थाप्य इमं
मे गंगे इति तीर्थोदकेनापूर्य गंधद्वारामिति चंदनागरु कस्तुरिक
र्पूर गोरोचनादीन् गंधान् गुग्गुलं च निक्षिपेत्। या ओंषधि
रिति सर्वौषधीः। ओंषधयः संमिति यवान्। काण्डात्काण्डादिति ॥१३॥
दूर्वाः। अश्वत्थे व इति पंचपल्लवान्। स्योना पृथिवीत्यनेन उद्धृ
तासि वराहेण कृष्णेन शतबाहुना। मृत्तिके हर मे पापं यन्मया
दुष्कृतं कृतमित्यनेन च पंचमृद्गः क्षिपेत्॥ याः फलिनीरिति

फलं। सहस्राणि तिपंचरत्नानि हिरण्यपलपमिति हिरण्यं ॥ युवा सु
वासा इत्यनेन वस्त्रपरिकृत सूत्रे पा च वेष्टयेत् ॥ पूर्णाद र्वैति धा
न्यपूर्णपात्रं कलशोपरि निदध्यात् ॥ अत्र वरुणावाहने प्र
जानेपि केचिदाहुः ॥ ततः कलशे सर्वे समुद्रा इति गंगाद्यावाह
नं ॥ ततः कुंभाभिमंत्रणं ॥ कलशस्य मुखे विष्णुः कंठे रुद्रः समा
श्रिताः ॥ मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥ कुक्षौ तु
सागराः सप्त सप्तद्वीपा वसुंधरा ॥ ऋग्वेदोथ यजुर्वेदः
सामवेदोह्यथर्वणः ॥ अंगैश्च सहिताः सर्वे कलशं तु समाश्री
ता इति ॥ ततः कुंभप्रार्थना ॥ देवदानवसंवादे मथ्यमाने महो

दध्यौरुत्पन्नोसि तदा कुंभ विघ्नतो विष्णुना स्वयं॥ त्वं तोये सर्वती
र्थानि देवाः सर्वे त्वयि स्थिताः॥ त्वयि तिष्ठंति भूतानि त्वयि प्रा
णाः प्रतिष्ठिताः॥ शिवस्वयत्वमेवासि विष्णुस्त्वं च प्रजापतिः॥ आ
दित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः॥ त्वयि तिष्ठंति सर्वे
१४॥ पियतः कामफलप्रदाः॥ त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलो ॥१४॥
द्भव॥ सांनिध्यं कुरु मे देव प्रसन्नो भव सर्वदेति॥ ततो ऋत्वि
जः आनो भद्रेति शांतिसूक्तं पठेयुरिति केचित्॥ आनोभ
द्रेति शांतिसूक्तस्य राहुगणो विश्वेदेवास्त्रिष्टुप् आद्याः सप्त
मी च जगत्यः षष्ठी विराट् शेषास्त्रिष्टुभः शांतिसू

त्तं जपे वा विनियोगः॥ आनोभद्राः ऋ आनोवातः प्रवि तामित्रा
दिकां वातस्मिन्नेव समये आचार्यो भद्रासनस्योत्तरत
ईशान्यां वा वस्त्राद्यादितपीठे विनायकप्रतिमां मं विक्रा
गतिमां चाग्न्युत्तारणपूर्वं प्रतिष्ठाप्य षोडशोपचारैः प्रत्ये
दिति निर्बंध्य दृतः॥ तत्र विनायकमंत्रः॥ गणानां त्वा गृत्स
मदो गणपतिर्जगति गणप[illegible]यावाहने विनियोगः॥ ॐ
गणानां त्वा ॐ तत्पुरुषाय विद्महे वक्रतुंडाय धीमहि॥ तन्नो
दंतिः प्रचोदयात् इति वा गौर्यास्तु गौरीर्मिमाय दीर्घतमा
दमा जगति गौर्या वाहने विनियोगः॥ गौरीर्ममोय सुमगा

यैविद्महे कामामालिन्यै धीमहि॥ तन्नो गौरि प्रचोदयादिति॥ अ
त्र मिताक्षरायां च स होमप्रवृत्तः॥ शिष्याध्ययनं कुर्वंति तस्मिन्पक्षे।
आचार्यो गृह्योक्तविधिना कुंडे स्थंडिले वाग्निं प्रतिष्ठाप्य पा
देशमात्रं समिद्द्वयमादायास्मिन्होमे देवतापरिग्रहार्थम
न्वाधानं करिष्ये इति संकल्प्य चक्षुषि आज्येनेत्यंतमुक्त्वा अत्र
॥१५॥ प्रधानमितं संमितं शालं कटंकटं कूष्मांडं राजपुत्रमेताः प्रधा
नदेवता एकैकया चर्वाहुत्या यक्ष्ये द्रोणपा स्विष्टकृतमित्यादि
ध्यालोकनांवदध्यात् अपरार्द्धं मतैतु पंचैवाहुतस्तन्मतेन्वा ॥१५॥
धानेहोमद्रव्येचतथैवातुसंख्यायां। ततः परिसमुह्य नादि चक्ष
पर्णांते स्वस्थालीपाकवत् लोलीदरतेन गौरसर्षपकल्केनोद्वर्ति

तागं सर्वैषधिभ्यरोः कस्तुरिकागरुचंदनादिभिर्विलिप्तशि
रषं यजमानं माचार्यो भद्रासने उपवेशायत् ।ततो यजमानः
स्वस्तिवाचनं कुर्यात् ॥ अनंतरं रूपगुणशालिनिभिः सु
वासनिभी निराजनं कारयेत् ॥ ततो भद्रासनात्पूर्वदेशा
वस्थितं कलशमादाया भिषिंचेदाचार्यः मंत्रश्च्या सहस्राक्षं
शतधारमृषिभिः पावनं स्रतं । तेनत्वामभिषिंचामिपावमा
नीः पुनंतु ते ।ततो दक्षिणादेशावस्थितं कलशमादाय ।भगं
ते वरुणो राजा भगं सूर्यो बृहस्पतिः ।भगमिंद्रं वायुश्च भ
गं सप्तर्षयो ददुः इत्यनेनाभिषिंचेत् ।ततः पश्चिमदिगवस्थि

॥१६॥ तमादाय यत्तेशेषु द्वौर्भागं सीमंतेच यच्चमूर्द्धनिल्ललाटके शा ॥१६॥
चोरक्ष्णोरापस्ताघ्नंतु ते सदेति। ततनुदकके शावस्थितं कु
लशमादायपवौचैस्त्रिभिर्मंत्रैरभिषिंचेत्॥ व्रहत्यराशा
रे पान्येपि मंत्रा उक्ताः॥ एतद्वै पावनं स्नानं सहस्राक्षमृषि
स्मृतं॥ तेनत्वाशातचारेण पावमान्यैः पुनंतु मां॥ शक्रादि दश
दिक्पाला ब्रह्मेशाः केशवादयः॥ आपस्ताघ्नंतु द्वौर्भाग्यं
शांतिय च्छंतु सर्वदा स्तु मित्रियान आप ओषधयः संतु दुर्मि
त्रिय स्तस्मै संतु॥ योस्मान्द्वेष्टि यं च वयं द्विष्मः॥ समुद्रा गिर
योनद्यो मुनयो श्च पतिव्रताः॥ द्वौर्भाग्यं घ्नंतु ते सर्वे शांतिं यच्छ

तुसर्वेशापादगुल्फोरुजंघादौनितंबोदरनाभिषु॥ स्तनोरस
बाहुहस्ताग्रग्रीवाअंसाघ्रिसंधिषु॥ नासाललाटकर्णभ्रू
केशांतेषु च यूस्थितं॥ तदायोषेतु दौर्भाग्यं शांतिपवंतु
सर्वदा॥ इत्यतैरप्यभिषिंचेदिति केचित्॥ चतुर्थे कलशाभि
षेचनएवैतेपठनियाः॥ अथाचार्यो यजमानस्यपश्चिमत
स्तिष्ठन् सव्यपाणिगृहीतकुशांतं यजमानशिरसि ओदुं
बरेणास्रुवेण सार्षपतैलं जुहुयात्॥ ॐ मितायस्वाहा॥ य
जमानो मितायानंदनमेति यजेदेवं सर्वत्रापि ॐ मिताय
स्वाहा॥ ॐ शालीयस्वाहा॥ ॐ कटंकटायस्वाहा॥ ॐ कु

षांगायं०ॐ राजपुत्रायेति॥ अथाचार्यो मधुर्चेनाय भागांतं दर
व्वीं बलं ग्रामिंतीं दिश्य एव जुहुयाद्यजमानस्तु पूर्वे वत्सजेत्‌॥
यः स्विष्टकृदादि प्राणिता विमोकांतं कर्मशेषं समापयेत्॥ य
षेकृ६ जमानस्तु भिंशालायामिंद्रादिदशदिक्पालेभ्यो नाम्नादिक्षु
विदिक्षु च बलिं दद्यात्॥ एतानि च अग्नि स्थापनं चरु होमं दि
॥१८॥ क्पाल बलिदानानि मिताक्षरामनुरभ्योक्तानि॥ ततो मिताक्षर
एव बलिर्नैमित्तिपायसेन मितादिभ्यो माषभक्तेन बलिं दद्याद्वि ॥१८॥
नायकांबिकयोर्यतः सक्तु दधि हरित तंडुलानां मांसेन तिलपि
ष्टेन वा मिश्रमोदनं मत्स्यमांसं पक्वमपक्वं च गौडी पैष्टी माध्वी

तित्रिविधोसुरा-यत्राह्मणस्यमांसस्थानेसलवणंपायसंसुरास्था
नेसलवणंदुग्धं चित्रं पुष्पं सुगंधिद्रव्यं मूलकं पूरिकाः अपु
पाउंडेरकृज्यं स्रजः॥ ३ ध्यान्नेपायसंगुडमिश्रितंतंदुलादिद्र
व्येपिष्टंमोदकाश्च पात्रेसंस्थाप्यतत्पुरुषायविद्महइतिमंत्रे
णविनायकायसुभगायैविद्महइतिमंत्रेण-चांबिकायैनिवे
दयेत् ततःशिरसाभूमिंगत्वापुष्पयुतंर्घ्यंसुरूषायेतिमंत्रेण
विनायकायसुभगायैरत्नंबिकायै-चदद्यात्॥ ततोदूर्वासर्ष
पपुष्पाणांपूर्वोक्तविनायकमंत्रेणविनायकांजलिंदद्यात्॥
अंबिकायैतन्मंत्रेणतथैवदद्यात्॥ ततोविनायकमंबिकांच

चोपतिष्ठेतमंत्रस्तुरूपं देहि यशो देहि भगं भगवति देहि मे ॥ पु
त्रां देहि धनं देहि सर्वान्कामांश्च देहि मे ॥ अस्मिन्मंत्रे भगं
भगवन्देहि मे इत्यूह्य विनायकमुपतिष्ठे ॥ अथाचार्यो नूत
॥१८॥ नशूर्पे सर्वमुपहारशेषं संस्थाप्य चतुष्पथं गत्वा तत्र गोमये
नोपलिप्य कुशानास्तीर्य तत्र शूर्पं प्राङ्मुखौ संस्थापयेत् ॥
यजमानस्त्वेतैर्मंत्रैर्बलिं दद्यात् ॥ बलिं गृह्णन्त्विमं देवा आ ॥१८॥
दित्या वसवस्तथा ॥ मरुतोथाश्विनौ रुद्राः सुपर्णाः पन्नगा
ग्रहाः ॥ असुरा यातुधानाश्च पिशाचा मातरोरगाः ॥ शाकिन्यो य
क्षवेताला योगिन्यः पूतनाः शिवाः ॥ जृंभकाः सिद्धगंधर्वा

नागा विद्याधरा नगाः ॥ दिक्पाला लोकपालाश्च विघ्नविनायकाः ॥
जगतां शांतिकर्त्तारो ब्रह्माद्याश्च महर्षयः ॥ माविघ्नं मा च मे पापं
मासंतु परिपंथिनः ॥ सौम्याभवंतु तृप्ताश्च भूतप्रेताः सुखाव
हाः ॥ इति वेदादित्यवसुमरुदश्विरुद्रसुपर्णपन्नगग्रहासु
रयातुधानपिशाचमातृगणशाकिनियक्षवेतालयोगिनिपूत
नाशिवस्कंभकसिद्धगंधर्वनागविद्याधरदिक्पाललोकपाल
विघ्नविनायकजगच्छांतिकर्तृब्रह्मादिमहर्षिभूतप्रेतेभ्यो इदं
३ नममैति यागः ॥ अनंतरं यजमानः प्राङ्मुखोपविष्टउदङ्मुखाया
यौदिनरपतज्ञइत्यो आचार्याय वासो युग्मरूपं ऋत्विजां यथाश

त्तिंदक्षिणां दद्यात्॥ ततउत्तिष्ठब्रह्मस्पतरस्यनेन इयांतु देवगणा
इत्यनेनचविनायकमंबिकाचोद्यापविसर्ज्यप्रतिमादिसर्वां
सामग्रीमाचार्याय दद्यात्॥ ततोयथाशक्तिभूयसींदद्यात् दी दक्षिणा
नानाथेभ्यो दत्वा यथाशक्ति विनायकप्रीत्यर्थमंबिकाप्रीत
येच ब्राह्मणान् भोजयित्वा संकल्पवाचयस्येस्मरस्येसाद्युक्त
॥१२॥ न्येनातिरिक्तं सर्वं संपूर्णमस्त्विति तान् संप्रार्थ्य तैरनुज्ञातः ॥१२॥
सुहृद्युतोभुंजीत॥ ॥ ॥श्रीमत्शंकरभटसूरिसूनुभट्टनी
लकंठरतो भगवंत भास्करे शांतिमयूखे विनायकशांतिप्रकृ
तिः समाप्तः॥५॥ ॥अथ ग्रहयज्ञः॥ स्कांदे॥ देवदानवगंधर्व

यक्षस्सकिन्नरः॥पीड्यंते ग्रहपीडाभिः किं पुनर्भूविमानवाः॥श
नैश्वरेण सौदासो तमांसे विनियोजितः॥राहुणापीडितोराजा न
लो भ्रांतो महितले॥ अंगारकेण विध्वंशे येन रामो राष्ट्रान्निर्वासि
तः॥ अथ येन रावणो नष्टि रणपंकगृहीतः॥रविणा सप्तमस्था पु
ने रावणो विनिपातितः॥गुरुणा जन्मसंस्थेन हतो राजा सुयो
धनः॥पांडवा बुधपीड्यां विकर्मणि नियोजिताः॥षष्ठेनो राजन
स्यायुक्ते हिरण्याक्षो निपातितः॥एते चान्ये च बहवो ग्रहदोषैस्तु
पीडिताः॥ ॥याज्ञवल्क्यः॥ ॥ग्रहाधीनान्नरेंद्राणामुच्छ्रायाः प
तनानि च॥भावाभावौ च जगतस्तस्मात्पूज्यतमा ग्रहाः॥प्रयो

गपारिजातउत्पलैःपरिमलैः॥ ॥कार्यारंभेषुसर्वेषुप्रतिष्ठास्वध्व
रेषुच॥ ॥नववेश्मप्रवेशानगर्भाधानादिकर्मसु॥आरोग्यस्ना
नसमयेसंक्रांतौरोगसंभवे॥अभिचारेचयःकुर्याद्ग्रहपू
जांविधानतः॥सोभीष्टफलमाप्नोतिनिर्विघ्नेननसंशयइति॥
॥२०॥ श्रीकामःशांतिकामोवाग्रहयज्ञंसमाचरेत्॥वृष्ट्यायुःपुष्टि
कामोवातथैवाभिचरन्नपि॥मात्स्ये॥ग्रहयज्ञस्त्रिधाःप्रोक्ताः ॥२०॥
पुराणाःश्रुतिकोविदैः॥प्रथमोयुतहोमःस्याल्लक्षहोमस्ततःप
रः॥तृतियःकोटिहोमस्तुसर्वकामफलप्रदः॥ग्रहस्योत्तरपू
र्वेतांमंडपंकारयेद्बुधः॥रुद्रायतनभूमौवाचतुरस्रमुदक्प्लु

वं॥ दशहस्तौ मध्यष्टौ वा हस्तान् कार्यो द्विधा नतः॥ तस्य द्वाराणि
चत्वारि कर्तव्यानि विचक्षणैः॥ स्कंदे॥ नवग्रहमखे कुंडं हस्तमा
त्रं समुभं॥ चतुरस्रो मध्ये हस्तं योनिवक्त्रं समेखलं॥ योनिरे
व वक्त्रं यस्य तत् पुत्रादिकामनया तु योन्याद्याकारा अपि भवंति॥
चतुरंगुलविस्तारा मेखला तद्वदुच्छ्रिता॥ अत्र विशेषोपदेशादेवै
व मेखलामास्ये॥ वितस्तमात्रा योनिः स्यात् षट्सप्तांगुलवि
स्तृता॥ कूर्मपृष्ठोन्नता मध्ये पार्श्वयोश्चांगुलोच्छ्रिता॥ गजोष्ठव
च्छीतद्वत् आयता च्छिद्रसंयुता॥ मेखलोपरि सर्वत्र अश्वत्थद
ला सन्निभा॥ एवं कुंडं च मंडपेशानभाग उदिच्यां भागे तु प्त आ वेदिं

प्रकल्पयेदित्याह॥ अत्र चतुरस्रमित्यनेन क्षत्रियादिपुरस्का
रेण विहितानामाकारविशेषाणां स्त्रीपुरस्कारेण विहितस्य
योन्याकारस्य निवृत्तिः यौनेपुत्राः स्तुभंदलैकाभरस्याघाः
कौम्यास्त्राकारा लवंस्येच॥ वेद्यां विशेषमाह गोभिलः॥ कुंड
स्य प्रागुदिच्यादिजन्मेसिध्यर्थं ग्रांसर्थं वायवेनात्विति यत्त
॥२१॥ ।वेदि [redacted] स्थंडिले पक्षेपि कार्या॥ वसिष्ठः॥ त्रिखेदषरक्तं
पमवेदिकोपरितंतुलैः॥ अत्रैकाग्निब्रह्मचार्यपक्षमुक्तौ ते ॥२१॥
षां नवसंख्याकुंडभुतत्तद्धहीकारांश्चाह प्रयोगपारिजाते
भगवान्॥ मनोरमेषु चौदेशो होमस्थालमलंदत्तो॥ दत्ता

तुसंवृत्तापत्रासोग्रहस्यानं प्रकल्पयेत् ॥ तन्मध्ये भास्करं स्थान
भवेत्पूर्वोत्तरे बुधः ॥ पूर्वास्मिन्भार्गवस्थानं सोमो दक्षि
णपूर्वके ॥ दक्षिणस्यां कुजस्थानं राहोर्दक्षिणपश्चिमे ॥ श
नेस्तु पश्चिमस्थानं केतोरुत्तरपश्चिमे ॥ उत्तरस्यां गुरोः स्था
नमेवं च स्थंडिलं भवेत् ॥ स्थंडिलमध्ये ॥ भास्करस्याच
र्तं स्याच्चंद्रस्य चतुरस्रकं ॥ कुजस्य तु त्रिकोणं स्याद्बाणाका
रं बुधस्य च ॥ गुरोर्दीर्घं चतुष्कोणं पंचकोणं सितस्य तु ॥ चापा
कारं शनेराहोः शूर्पं केतोर्ध्वरा स्मृति ॥ नवधा विभजेद्भिंश्वे
तकर्मविधानतः ॥ ऋत्विजश्च यथायोग्यं कुंडेषु ब्राह्मणाः प

कूः॥ अथ सर्वेषां जुहुयात्॥ सूर्यं पावक रुद्र कान्॥ ऋषि जो जु
हुयुः सर्वे स्रुवेणैव पृथक्॥ अथैतु शाकलान् गृह्य समारोप
णमग्निषु प्रधानाग्नौ निधायामानि स्येहोमं समाचरेदिति॥
अत्रैवं च स्थंडिलं भवेदिस्यनेन स्थंडिलानां कुंडानां च अका
॥२२॥ रस्तत्र दिक्ष्वग्निवेश्योक्तः ब्राह्मणाः पृथग्गि स्यनेन नवाचार्या ब्रा ॥२२॥
ह्मणाश्च नवेत्युक्तं॥ अत्रार्थ संक्षेपः॥ प्रयोगपारिजाते॥ मध्य
कुंडे स्मार्ताग्निं अप्रणीय ततो नवाचार्या अष्टसु कुंडेषु प्रणीया
न्यभागांते॥ कौदिसमिद्भिर्गुडोदनं॥ दिहविर्भिः राज्येन चरहा
दिमंत्रैर्हुत्वा व्यस्त समस्त व्याहृतिभिश्च तिलान्हुत्वा स्विष्टकृ

त्वाद्विहोमं शेषं दत्वा पूर्णाहुतिं जुहुयादिति कुंड मुक्तो स्कांदे ॥ त
स्य चोत्तरपूर्वे स्थंडिलं हस्तमात्रकं ॥ त्रिवप्रं चतुरस्रं च वित
स्त्युच्छ्रयसंमितं ॥ स्थंडिलं वेदिः ॥ वप्रो मेखला ॥ मात्स्ये ॥ द्वि
रंगुलोच्छ्रितो वप्रः प्रथमः समुदाहृतः ॥ त्र्यंगुलोच्छ्राय संयुक्तं
वप्रद्वयमथोपरि ॥ द्व्यंगुल स्तत्र विस्तारः सर्वेषां कथितो बु
धैः ॥ तत्र ग्रहानाह याज्ञवल्क्यः ॥ सूर्यः सोमो महीपुत्रो सोम
पुत्रो बृहस्पतिः ॥ शुक्रः शनैश्चरो राहुः केतुश्चेति ग्रहाः स्मृ
ताः ॥ स्कांदे ॥ नवग्रह मखे ब्रूयात् ॥ ऋत्विजः श्चतुरः शुभा
न् ॥ अथ वा चैकमभ्यर्च्य विधिना ब्राह्मणान्तह ॥ त्रिविध्यमपि

नवग्रहमुपक्रम्य वशिष्ठस्तु षोडशब्राह्मणान् सुद्धान् दंभान्
तविवर्जितान्॥ तेषां मध्ये श्रेष्ठतममाचार्यं तं प्रकल्पयदिति॥
अत्र पारिजाते नवाचार्याः एको ब्रह्मणः षड्विजा वा आचार्योयो
न मध्ये श्च ग्रहार्चनं फलं तत इत्युक्तेः॥ आचार्यं कुर्मः एकं वृ
व कुर्यात् परे त्वारं भमाह॥ वेन्ना ग्रहदक्षिणापि तेभ्य एव
॥२३॥ देयाइत्याह्युक्तं॥ तदयुक्तं॥ उपक्रमः एकाचार्यस्य श्रुतेराचा ॥२३॥
र्याणाचार्यसमुदाये प्राप्तात्वात्॥ उपदधातीति वल्लिंगस
मवायमात्रेणानवम्याइत्सूपसंहारस्य पद्योपपतेः॥ उपक्रमे
पि यद्यप्याचार्यस्य संस्कार्यस्यैकत्वमविवक्षितं तथा
प्याचार्यस्य श्रुतत्वाभावादुपयोगाभावात् संस्कार्यत्वानुपपत्तेः

ब्रत आचार्यः स्वकर्म्म कुर्याद्दिति॥ कल्पित वाक्य उपादेय
वादाचार्यस्य भवत्यकं विवक्षितं॥ उपपादितं॥ चेदमध्व
र्युं वृणीते॥ होतारं वृणीते पुरोहितं वृणीते॥ इत्यत्र मिश्रे
जन्मभूर्गोत्रमग्निश्च वर्णस्थानं मुखानि च॥ योसौ यो कुत
ते शांति यत्तास्तेनावमानितो॥ तत्र वर्णजन्मनी आह दामो
दरीयवृत्त उपराशरः॥ रक्तः कश्यपजो भानुः शुक्लो ब्रह्मसु
तः शशी॥ रक्तो रुद्रसुतो भौमः पीतः सोमः सुतो बुधः॥ पीतो
ब्रह्मसुराचार्यः शुक्लः शुक्रो भार्गवोद्भवः॥ कृष्णः शनिरविपुत्रः
कृष्णो राहुपत्र आपतेः॥ कृष्णः केतुः कृष्णान्त्यः कृष्णः पापास्य

योप्यमि॥स्कोंदे॥उत्पनोर्कः कलिंगेषु यमुनायांच चंद्रमाः॥अं
गारकस्त्ववंत्यायांमगध्यायां हिमांशुजः॥सैंधवेषु गुरुर्जातः शु
क्रो भोजकटे तथा॥शनैश्चरस्तु सौराष्ट्रे राहुर्वैराटिनांपुरे॥
अंतर्वेद्यां तथा केतुरित्युता ग्रहभूमयः॥यस्य यस्य च यज्जो
त्रं तत्तद्वक्ष्याम्यतः परं॥आदित्यः काश्यपे गोत्रे आत्रेयश्चंद्र
॥२५॥ माभवेत्॥भारद्वाजो भवेद्भौमो स्तथात्रेयश्च सोमजः॥सु
रेज्योंगिरोगोत्रः शुक्रो वैभार्गवस्तथा॥शनिः काश्यपर ॥२५॥
वोथ राहुः पैठीनसस्तथा॥केतवो जैमिनियाश्च ग्रहा गि
स्तदनंतरं॥आदित्य कपिलो नाम पिंगलः सोम उच्यते॥

धूमकेतुस्तथा भौमे जाठराग्निर्बुध स्मृताः ॥ गुरोश्चैव शिखी
नाम शुक्रे भवति हाटकः ॥ शनैश्चरे महातेजा राहुके लोहिताश्व
नः ॥ एतानि ग्रहविशेषतोग्निनामानि ॥ कर्म्मविशेषतोपि दे
वीपुराणे ॥ शुभा ग्रहविधौ पोग्निर्लक्षहोमे पारिजातः ॥ कोटि
होमे शिवो वह्निः सर्वकामप्रदायकः ॥ क्वचित्तु ॥ लक्षहोमे तु
वह्निः स्यात् कोटिहोमे हुताशन इति ॥ स्कांदे ॥ भास्करांगारकौ
रक्तौ श्वेतौ शुक्रनिशाकरौ ॥ सोमपुत्रो गुरुश्चैव तावुभौ पीत
कौ स्मृतौ ॥ कृष्णः शनैश्चरं विद्याद्राहुं चित्रं च केतवः ॥ मध्य

तुभास्करं विद्यात्पश्चिनेपूर्वदक्षिणे ॥ दक्षिणेलोहितं विद्याद्बुधं
पूर्वोत्तरेणतु ॥ उत्तरेण गुरुं विद्यात्पूर्वेणतु भार्गवं ॥ पश्चिमे
नशनिं विद्याद्राहुं पश्चिमदक्षिणे ॥ पश्चिमोत्तरतः केतुः स्था
प्योवैशुक्लतंदुलैः ॥ अथ नावर्णकैः कार्याः ॥ कार्याः सुवर्णा
दिधातुभिः ॥ यासेवल्लभ्यः ॥ ताम्रकास्फटिकाद्रत्नचंदना
॥२५॥ स्वर्णजाबुओ ॥ रजतादयस सीसा कास्या कार्या ग्रहस्त ॥२५॥
था ॥ वशिष्ठः ॥ यथारुचि प्रमाणेन प्रतिमाः कल्पयेत्सुधीः ॥
अत्रसर्वत्रग्रहाणां सूर्यादिक्रमस्यैवबुधायनः स्तु सूर्याङ्गा
रकशुक्रचंद्रबुधगुरुशशानयरसाह ॥ स्कांदे ॥ भानुंतु मंडल

कारं सोमं तु चतुरस्रकं ॥ अंगारकं त्रिकोणं च बुधं बाणाकृतिं
तथा ॥ दीर्घं चतुरस्रं गुरुं पंचास्रं भार्गवं तथा ॥ धनुस्तुल्यं श
निं विंद्याद्राहुं शूर्पाकृतिं तथा ॥ ध्वजाकाराः केतवश्च गं पो
शं तत्र रूपिणां ॥ रूपिणां हस्तपादादयवयवयुतं ॥ स्थापयेद्बु
द्धः तंडुलैर्वर्णकै र्लेख्या इत्येतत्लक्षयोमं लाद्याकार ते तिहे
मादिः ॥ तत्रैव शुक्रा कौ प्राङ्मुखौ ज्ञयौ गुरुसो म्याबुदङ्मुखौ ॥
प्रत्यङ्मुखः शनिः सोमः शेषा दक्षिणतोमुखाः ॥ इदं च शुक्रा
दीनां प्राङ्मुखादि आदित्यादिमुखाः सर्वे इति मात्स्यो क्ता
दि ॥ साभिमुखत्वेन विकल्पते ॥ यत्तु हेमाद्रि विकल्पते ॥

परिज्ञितीर्षयाः॥ प्राङ्मुखोबद्धदृष्टीउदङ्मुखोथोदक्षिर्दक्षिणतोमु
खाः दक्षिणादपादष्टपद्धतिर्व्याचष्टा॥ तत्रमङ्गलंचिंत्यं॥ विरोधता
वदस्थंचवर्णरूपगुणोयुक्तान्याहस्याहावपेत्तुतान्॥ मात्स्ये॥
पुण्यवक्तिविप्रकृथितेन्द्रस्याब्राह्मणवचनं॥ अग्निप्रणयनेदृ
त्वावेद्यामावाहयेत्सुरान्॥ देवतत्वसंस्थाप्याविंशतिर्द्वादशा
॥२९ ष्टिकान्॥ आदित्यासिमुखाः सर्वेसाष्टिप्रत्यष्टिदेवताः॥ वि
ष्णुधर्मोत्तरे॥ अतः परंप्रवक्ष्यामियोदेवोयोग्रहास्मृतः॥ अ ॥२९॥
ग्निरर्कस्मृतः सोमोवरुणः परिकीर्तितः अंगारकः॥ कुमार
श्चबुधश्चभगवान्हरिः॥ बृहस्पतिः स्मृतः शक्रः शुक्रोदे

शीच पार्वती ॥ प्रजापतिः ॥ शनिश्चैव राहुर्ज्ञेयो गणाधिपः ॥ विश्वक
र्मा स्मृतः केतुर्ये ग्रहास्ते सुराः स्मृताः ॥ अत एवाग्न्यादिलि
गकामंत्राः सूर्यादिस्थापनं तु क्तास्कांदे ॥ अग्निर्दूतं दिने शाय
सूर्याचीसंतइत्यापि ॥ शंनो नाए थि वि श्लोमायइदं विष्णुर्बुधाय
च ॥ इंद्र आसोसस्तरे इत्याय च शुक्र ज्योतिः सिताय च ॥ प्रजाप
ते ति सौराय आयं गौरिति राहवे ॥ केतवे ब्रह्मज्ञानं स्वस्वे
मंत्रैः प्रतिष्ठिताः ॥ एते पंच मंत्राणि व्याहृत्यावाहयेत्तु तानि
सूक्तानि व्याहृतिरावाहने विकल्पः ॥ मदनं स्वावाहनं स्थापा
न योर्भेदाद्व्याहृतिभिरावाहनं ॥ एतैर्मंत्रैः स्थापनमित्युच्य
पारिजाते वामनस्तु ॥ प्रपावं बाह्वितः दन्वा ग्रह भुवः स्वमतः प

रं॥ चतुर्थीनाम संयुक्तं नमस्कारांतयोजितं॥ एषं मंत्र समाख्यातो
ग्रहपूजां विधायकः॥ अनेनावाहनं कुर्यादनेनैव विसर्जन
मिस्मृचे॥ अत्रावाहनवाक्येषु विशेष माहबोधायनः॥ क्षिरि
टिनं पद्मासनं परारूरं पद्मगर्भसमद्युतिं तन्नाश्वं सप्तरवड्
कलिंगदेशजं काश्यप गोत्रं विश्वामित्रार्षं त्रिष्टुपछंद संरक्ताभ
रणभूषितं॥ रक्तगंधानुलेपनं रक्तछत्रध्वजपताका ... मुकुट
केयूरमणिशोभितं आरुह्य रथं दिव्यं मेरुं प्रदक्षिणा कुर्वा
णं ग्रहमंडले प्रविष्टमभ्यधि देवताग्निसहितं प्रत्यधिदेवते संश्व
रं सहितं रक्तवर्त्तमंडले पूर्वमुखमादित्यमावाहयामि॥ क्षिरि

॥२७॥

टिनेरक्तमाल्यांबरंरक्तस्त्रलंगदाधरं॥चतुर्भुजंषगमनमवंतिदेशा
जंवशिष्ठगोत्रजंजमदग्न्यार्षजगतीछंदसंरक्तांबरधरंरक्ताभर
णाभूषितंरक्तमाल्यानुलेपनंरक्तछत्रध्वजपताकिनंमुकुटकेयू
रमणिशोभितंमारुत्वरथंदिव्यंमेरुंप्रदक्षिणाकुर्वाणंग्रहमंडले
दक्षिणामुखमंगारकमावाहयामि॥क्षिरीटिनेश्वेतवर्णंचतुर्भुजं
दंडिनंवरदंकाव्यंसाक्षसूत्रकमंडलुं॥त्रिकूटदेशजंभार्गवगोत्रजं
शौनकार्षपंक्तिछंदसंश्वेतांबरधरंश्वेताभरणाभूषितं॥श्वेतगंधा
नुलेपनंश्वेतछत्रध्वजपताकीनंमुकुटकेयूरमणिशोभितंमारुत्व
रथंदिव्यंमेरुंप्रदक्षिणीकुर्वाणंग्रहमंडलप्रविष्टमध्येदेवतेंद्रा

पिासहितंप्रत्यधिदेवतंऊसहितंशुक्लपक्षश्चकोणमंडलेप्राङ्मुखंभ
गवंतंशुक्रमोवाहयामिगाक्षिरीटिनंश्वेतांबरधरंदशाश्वंश्वेतभू
षणंपाशपाणींद्विबाहुंवनायुदेशजमित्रगोत्रमात्रेयार्षमनुष्टुप्छं
दसंश्वेतांबरधरंश्वेताभरणभूषितंश्वेतगंधानुलेपनंश्वेतछत्र
पताकिनंमुकुटकेयूरमणिशोभितंमारुह्यरथंदिव्यंमेरुंप्रदक्षिणि
र्वाणंग्रहमंडलेप्रविष्टमधिदेवताप्रत्यधिदेवतामास
हितंचतुरस्रमंडलेप्रत्यङ्मुखंसोमवाहयामिगाक्षिरीटिनंपितमा
ल्यांबरधरंपीतवर्णंकर्णिकारसमद्युतिंखड्गचर्मगदापाणिंसिंह
स्थंवरदंमध्यदेशजमत्रिगोत्रजंभारद्वाजार्षंबृहस्पतिछंदसं

॥२९॥

पितांबरधरं पीताभरणभूषितं पितगंधानुलेपनं पीतछत्रध्वज
पताकिनं मुकुटकेयूरमणिशोभितं भितमारुह्यरथं दिव्यं मेरुं
प्रदक्षिणीकुर्वाणं ग्रहमंडले प्रविष्टमधिदेवताविष्णुसहितं प्रत्यधि
देवताविष्णुसहितं पीतवर्णं मंडले प्रदक्षिणामुखं बुधमावाह
यामि॥ किरिटिनं पितवर्णं चतुर्भुजं दंडिवरदं सादक्षसूत्रकमं
डलुं सिंधुदेशजमांगिरसगोत्रं वसिष्ठार्षमनुष्टुप्छंदसं पी
तांबरधरं पीताभरणभूषितं पीतगंधानुलेपनं पीतछत्रध्वज
पताकिनं मुकुटकेयूरमणिशोभितं मारुह्यरथं दिव्यमेरुं प्र
दक्षिणीकुर्वाणं ग्रहमंडले प्रविष्टमधिदेवतेंद्रसहितं पीत

दीर्घचतुरस्त्रमंडले उदङ्मुखं गुरुमावाहयामि ॥ किरीटिनमिं
द्रनिलं समद्युतिं शुक्लांबरं वरदं गजवाहनं सबाणबाणास
नधरं सौराष्ट्रदेशजं काश्यपगोत्रजं भृग्वार्षं गायत्रीछंदसं रक्ता
बरधरं रक्ताभरणाभूषितं रक्तगंधानुलेपनं रक्तछत्रध्व
॥१२॥ जपताकिनं मुकुटकेयूरमणिशोभितं मारुह्यरथं दिव्यमेरुं
प्रदक्षिणं कुर्वाणं ग्रहमंडले प्रविष्टमधिदेवताप्रजापतिसहि
तं प्रत्यधिदेवतायमसहितं धनुष्पनुमंडले प्रत्यङ्मुखं शनै ॥१२॥
श्चरमावाहयामि ॥ किरीटिनं करालवदनं खड्गचर्मशूलध
रं सिंहासनस्थं पूर्वदेवाज्जं पाटलिगोत्रमांगिरसार्षमनुष्टु

पूछंदसंकृष्णछत्राबरकृष्णाभरणाभूषितंकृष्णगंधानुलेपनंकृ
ष्णछत्रध्वजपताकिनंमुकुटकेयूरमणिशोभितंमारुह्यरथं
दिव्यमेरुंप्रदक्षिणीकुर्वाणांग्रहमंडलेप्रविष्टमध्येदेवतास्व
रूपसहितंप्रत्यधिदेवताकालसहितंकृष्णाशूर्पमंडलेदणाभि
मुखंराहुमावाहयामि॥ध्यानं॥द्विबाहुंनपाशरायविकृता
ननायगृध्रवाहनायकिरिटिनोमध्यदेशजायजैमिनि
गोत्रजायकृष्णगौतमार्षायनानाच्छदसंश्रित्रांबरधराश्चि
त्राभरणभूषितांश्चित्रगंधानुलेपनायकृष्णापिंगलध्वज
पताकिनोमुकुटकेयूरमणिशोभितानारुह्यरथंदिव्यंमे

॥३०॥ प्रदक्षिणीकुर्वाणान्‌ ग्रहमंडले प्रविष्टानधिदेवताब्रह्मसहिता
न्प्रत्यधिदेवताचित्रगुप्तसहितान्‌ स्वछागपिंगलध्वजदक्षि
णामुखान्केतूनावाहयामि स्कांदे ॥३ ध्वरं भास्करं विद्याद्धुमं
विद्यान्निशाकरे ॥ स्कांदमंगारके विंद्याबुधे नारायणं विदुः ॥
गुरौ वेदनिधिं विंद्यात्‌ शुक्रे शुक्रो विधीयते ॥ शनैश्चरे यमं
विद्याद्राहौ कालं स्तथैव च ॥ चित्रगुप्तोधिपः केतोरिति स्याग्र ॥३०॥
हदेवता ॥ वेदनिधिर्ब्रह्मा ॥ तत्रैव वक्ष्ये स्थानानि देवानामीश्व
रादि यथाक्रमं ॥ सूर्यस्यैवोत्तरशंभुमुमांसोस्य दक्षिणे ॥
स्कांदमंगारकस्यैव दक्षिणस्यां निवेशयत्‌ ॥ सौम्यास्यपश्चि

मतो विष्णुर्ब्रह्मा ब्रह्मोऽभीवस्य पर्वतः॥ इंद्रमेऽग्नां सिताद्धि श्विंं
मंदाग्ये यतो यमे॥ राहोः पूर्वोत्तरे कालं सर्वभूतभयावहं॥
केतोनैरुतो दिग्भागे चित्रगुप्तं निधापयेत्॥ स्कांदे॥ छ॥
अतः स्थापनमंत्राश्च कथ्ययाम्यतु पूर्वशः॥ इस्वरं त्र्यंबकं
चेति श्रिश्चतेति पार्वती। यदक्रंदेति च स्कंदं विष्णुं विष्णुरगादि
ति॥ आब्रह्मन्निति ब्रह्माणं सजोषेंद्रेति वासवं॥ यमाय त्वेति
च यमं कालं काषिं रसिति च॥ चित्रावस्विति मंत्रेण चित्र
गुप्तं निधापयेत्॥ अग्निरापः क्षितिर्विष्णुरिंद्रश्चैंद्रि प्रजा
पतिः॥ सर्पो ब्रह्मा च निर्दिष्टा अधिदेवयथाक्रमं॥ अग्निं

॥३१॥

दूतमिति चेन्न वैरूपास्यादुक्तमं॥ स्योनापृथिविमेदिन्या इदं विष्णुस्तु विष्णवे॥ इंद्राचेद्रोइतीद्रस्यो त्मानपर्णेची स्थिते॥ प्रजापते: प्रजश्च स्य ब्रह्मेति वै विधे:॥ मंत्रोन मोस्तु सर्पेभ्यः सर्पाणां स्थापने मत:॥ ग्रहदेवाधिदेवानां नैवेद्यं कुसुमानि च ग्रहवच्चासनं दानं स्थापनं चान पर्वरा:॥ अत्र सूर्यादयो ग्रहा ईश्वराद्योदेवा अग्न्यादयोधिदेवा:॥ तत्रेश्वरादिदेवानां सूर्यस्यैवोत्तर शंभुमित्यादिना पर्वं संबंधाम्युक्तानि देवा:॥ स्तुग्रहदेवयोर्वै मध्यस्थाप्या॥ तथा च मदरत्ने गोभिल वसिष्ठो॥ ग्रहदेवयोर्मध्ये अधि

॥३१॥

देवान्निधापयेत्॥ तत्रैव संग्रहे तु ईश्वराद्यो देवा अधिदेवताः॥
स्थापनीयाः प्रणवेन व्याहृतिभिः पृथक् पृथक्॥ तत्रैव वासिष्ठे॥
यत्तु देवतानां स्थापनांतरं कश्चिन्मंत्रांतरं चोक्तं॥ रुद्रं त्र्यंबकं
मंत्रेणापरवे रुत्तरतं न्यसेत्॥ सोमस्याग्नेयदिग्भागे श्रीप्यतेमे
न कात्मज्ञां॥ यदक्रंदेति भौमस्य स्कंदयाम्य प्रदापयेत्॥ वि
ष्णुं विष्णुरराटेति यज्ञे सर्वे बुधस्य च॥ गुरोरुत्तरतो भ्यर्च्यो
ब्रह्मा ब्रह्मेति मंत्रतः॥ सजोषं द्रेति शुक्रस्य प्राच्यां शुक्रमि
निधापयेत्॥ शनैः पश्चिमतस्थाप्यो यमात्वेस्य चायमः॥
कारुभिर सितिमंत्रेण राहोः कालं तथोत्तरे॥ चित्रगुप्तं केतु

नोंचित्रावश्वेतिनै ऋते॥ग्रहाध्यदेवतास्याता: शृणुध्वातोधि
देवता:॥अग्निद्रापोधरा विष्णुरिंद्रं द्राणी प्रजापतिः॥सर्पा
ब्रह्मा च निर्दिष्टा अधिदेवा यथाक्रमं॥ग्रहदेवतयोर्मध्ये
अधिदेवान्निवेशयेत्॥एतानि च वाग्निष्ठीयवचांसिवै
श्चिनोद्भियंते॥पारिजाते॥पद्मप्रागदलमारभ्य दलाग्रेक
॥३२॥ मान्यसेत्॥इंद्रादिलोकपालाश्च तत्तन्मंत्रेण पूजयेत्॥वि ॥३२॥
नायकं तथा दुर्गा वायुराकाशमेव च॥आवाहयेत् व्याहृति
भिस्तथैवाश्विकुमारको॥एते च विनायकाः पंचग्रहेभ्य उत्त
स्तथाप्याइति सांप्रदायका॥दक्षिणापश्चिमवायव्योत्तरष

वेण यथाक्रममिसन्यो राहुमंददिनेशानांमुत्तरस्यां यथाक्रमं॥
गणेशोदुर्गावायुश्च राहुकेतुश्च दक्षिणेऽग्निकोणमध्ये नोचे
तिपंचैतान्स्थापयेद्बुध इति संग्रहवचनानुसारेणेतित पिता
महश्चरणाः रूपनारायणश्च स्कांदे उत्तरे शानिसूर्याभ्यां गुरुं
केतोश्च दक्षिणे॥ गणाधिपं प्रतिष्ठाप्य सर्वदेवनमस्कृतं॥
रविशनिकेतुरूपां मध्य इति पूर्वितोर्थः॥ विनायकपदमु
पलक्षणंलिंगद्दुर्गादयोप्यत्रैस्याइतिकेतु॥ चंदनादिनिवेद्य
नमस्तत्रैव॥ दिवाकरकुजाभ्यांहि रापयेद्रक्तचंदनम्॥ चं
द्रवभार्गवेचैवसितवर्णप्रदापयेत्॥ कुंकुमेनतुसंयुत्तं च

॥३७॥

दनं जीवसोम्यृयोः॥ अगर चंदनं दद्याद्गुरुं केवलं कैजे शुचा॥ ग्र
ह वर्णानि पुष्पाणि॥ गायत्र्या धूपमाहरेत्॥ गरवेः कुंकुमाज्यं रवेर्धू
पं शाखिनस्तु घृताक्षतारवेः इदं चमुख्यं कुंदुरु कूधूपं॥ कुंदुरु
के: सल्लकिनिर्यासस्सिल्हारतिमथ्याद् ज्ञोप्रसिद्धं॥ बिल्वागु
रुं बिल्वफल निर्याससहितमगुरुं॥ मंदस्यार्यः ज्ञानिः॥ भौमे
सर्जरसं चैव गुरुं च बुधे स्मृतं॥ सिल्हकं गुरवे दद्यात् शुक्रे
बिल्वागुरुं तथा॥ गुग्गुलं मंदवारे तु लौक्षीरो होश्चेके तवो॥
उद्दिवस्विति मंत्रेण दीपं दद्यादतंद्रि॥ विहितं गंधधूपादिना
मसंभवे तु याज्ञवल्क्यः॥ यथा वर्णं प्रदेयानि वासांसि कुसु

॥३७॥

मानि च ॥ गंधाश्च बल्यं चैव धूपो देयश्च गुग्गुलुः ॥ स्कांदे ॥ गुडोदनं
रवेर्दद्यात् सोमाय घृतपायसं ॥ लोहिताय हविष्यान्नं बुधाय क्षीर
षाष्टिकं ॥ दध्योदनं गुरोर्दद्यात् शुक्राय घृतोदनं ॥ मिश्रितं ति
ल माषैश्च नैवेद्यं तु शनैश्चरे ॥ राहोर्मांसोदनं दद्यात् केतोश्चित्रौद
नं तथा ॥ चित्रौदनं तिलतंदुलमिश्रं स्यात् क्षीरं च शोणितं ॥ कृप
ना साग्रहीतं स्यादेतच्चित्रौदनं स्मृतमिति दामोदरः ॥ एतैरेव
द्रव्यैर्ब्राह्मणा अपि भोज्याः । तथा च याज्ञवल्क्यः ॥ गुडोदनं पाय
सं च हविष्यं क्षीरषाष्टिकं दध्योदनं हविश्चूर्णं मांसं चित्रान्न
मेव च ॥ दद्याद्ग्रहक्रमादेतद्द्विजेभ्यो भोजनं बुधः ॥ शक्ति

तोवा यथालाभं सल्लसविधि पूर्वकं ॥ वसिष्ठः ॥ उपचाराप्ति
सर्वेषामपि शुक्लाक्षतैः सदा ॥ गंधाभावेस्तु कुंकुमं गंधं पुष्पाभा
वेस्तु गंधकं ॥ धूपाभावे गुग्गुलं स्यात् द्रव्याभावे तु मिश्रकं ॥ पं
